# माण्डूक्योपनिषत्

**शान्तिपाठः**

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।

स्थि॒रैरङ्गै᳚स्तुष्टु॒वांस॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।

स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृ॒हस्पति॑र्दधातु ।

ओम् शान्ति॒ः शान्ति॒ः शान्तिः॑ ।

## भाष्यमङ्गलाचरणम् १

**प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्यलोकान्**

**भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।**

**पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ्मायया भोजयन्नो**

**मायासङ्ख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोस्मि ।। १ ।।**

अन्वयः

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिः लोकान् व्याप्य स्थविष्ठान् भोगान् भुक्त्वा पुनरपि धिषणा उद्भासितान् कामजन्यान् (भुक्त्वा) सर्वान् विशेषान् पीत्वा स्वपिति मधुरभुग् मायया नः भोजयत् मायासंख्यातुरीयं परममृतमजं यत् ब्रह्म (वर्त्तते) तत् नतः अस्मि ।।

भाष्यमङ्गलाचरणम् २

**यो विश्वात्मा विधिजविषयान् प्राश्य भोगान् स्थविष्ठान्**

**पश्चाच्चान्यान् स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् ।**

**सर्वानेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा**

**हित्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ नस्तुरीयः।। २ ।।**

अन्वयः

यो विश्वात्मा विधिजविषयान् स्थविष्ठान् भोगान् प्राश्य पश्चात् च अन्यान् स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् (प्राश्य) पुनरपि सर्वानेतान् शनैः स्वात्मनि स्थापयित्वा सर्वान् विशेषान् हित्वा विगतगुणगणः असौ तुरीयः नः पातु ।

ओमित्येतदक्षरम् इदं सर्वम्।

तस्योपव्याख्यानं वेदन्तार्थ-सार-सङ्ग्रह-भूतमिदं प्रकरण-चतुष्टयम् ओमित्येतदक्षरम् इत्याद्यारभ्यते।

अत एव न पृथक् सम्बन्धाभिधेय-प्रयोजनानि वक्तव्यानि।

यान्येव तु वेदान्ते सम्बन्धाभिधेय-प्रयोजनानि तान्येव इह भवितुमर्हन्ति।

तथापि प्रकरण-व्याचिख्यासुना संक्षेपतः वक्तव्यानि।

तत्र प्रयोजनवत्-साधनाभिव्यञ्जकत्वेन अभिधेय-सम्बद्धं शास्त्रं पारम्पर्येण विशिष्ट-सम्बन्धाभिधेय-प्रयोजनवद्

भवति।

किं पुनः तत्प्रयोजनम् इत्युच्यते - रोगार्त्तस्य इव रोग-निवृत्तौ स्वस्थता एव, तथा दुःखात्मकस्य आत्मनः द्वैत-प्रपञ्चोपशमे स्वस्थता, अद्वैत-भावः प्रयोजनम्।

द्वैत-प्रपञ्चस्य अविद्या-कृतत्वाद् विद्यया तदुपशमः स्यादिति ब्रह्म-विद्या-प्रकाशनाय अस्य आरम्भः क्रियते।

यत्र हि द्वैतमिव भवति (बृ. २.४.१४), यत्र वा अन्यदिव स्यात् तत्रान्यः अन्यत् पश्येत्, अन्यः अन्यद्विजानीयात् (बृ. ४.३.३१) यत्र वास्य सर्वम् आत्मैवाभूत्...तत्केन कं पश्येत् ... तत् केन कं विजानीयात् (बृ. २.४.१४) इत्यादि-श्रुतिभ्यः अस्यार्थस्य सिद्धिः।

**प्रकरणचतुष्टयप्रतिपाद्यार्थनिरूपणम्**

तत्र तावद् ओङ्कार-निर्णयाय प्रथमं प्रकरणम् आगम-प्रधानम्, आत्म-तत्त्व-प्रतिपत्त्युपाय-भूतम्।

यस्य द्वैत-प्रपञ्चस्योपशमे अद्वैत-प्रतिपत्तिः, रज्ज्वाम् इव सर्पादि-विकल्पोपशमे रज्जु-तत्त्व-प्रतिपत्तिः,

तस्य द्वैतस्य हेतुतः वैतथ्य-प्रतिपादनाय द्वितीयं प्रकरणम्।

तथा अद्वैतस्यापि वैतथ्य-प्रसङ्ग-प्राप्तौ युक्तितः तथात्व-दर्शनाय तृतीयं प्रकरणम्।

अद्वैतस्य तथात्व-प्रतिपत्ति-प्रतिपक्ष-भूतानि यानि वादान्तराणि अवैदिकानि तेषामन्योन्य-विरोधित्वाद्

अतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थं प्रकरणम्।कथं पुनः ओङ्कार-निर्णयः आत्म-तत्त्व-

प्रतिपत्युपायत्वं प्रतिपद्यते इत्युच्यते - ओम् इत्येतत् (क. १.२.१५), एतदालम्बनम्.. (क. १.२.१७), एतद्वै सत्यकाम (प्र. ५.२), ओमित्यात्मानं युञ्जीत (मैत्रायणी ६.३, म.ना. अनुवाक ७९), ओमिति ब्रह्म (तै. १.८), ओङ्कार एव इदं सर्वम् (छा. २.२३.३) इत्यादि-श्रुतिभ्यः।

रज्ज्वादिः इव सर्पादि-विकल्पस्यास्पदः, अद्वयः आत्मा परमार्थः सन् प्राणादि-विकल्पस्य आस्पदः यथा, तथा सर्वोऽपि वाक्प्रपञ्चः प्राणाद्यात्मक-विकल्प-विषयः ओङ्कारः एव। स च आत्म-स्वरूपमेव, तदभिधायकत्वात्।

ओङ्कार-विकार-शब्दाभिधेयश्च सर्वः प्राणादिः आत्म-विकल्पः, अभिधान-व्यतिरेकेण नास्ति।

वाचारम्भणं विकारो नामधेयम् (छा. ६.१.४), तद् अस्य इदं वाचा तन्त्या नामभिः दामभिः सर्वं सितम् (ए. १.६.१) सर्वं हि इदं नामनी (ऐ. १.६.१) इत्यादि श्रुतिभ्यः। अत आह -

**हरिः ओम्। ओमित्येतदक्षरमिदँ्सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव।। १ ।।**

ओमिति एतदक्षरम् इदं सर्वम्। तस्योपव्याख्यानम् (क्रियते।)। भूतं भवद् भविष्यदिति सर्वमोङ्कार एव।
तद् अन्यत् च यत् त्रिकालातीतम् (तद्) अपि ओङ्कार एव।। १

ज्ठओमित्येतदक्षरमिदं सर्वम् इति। यदिदमर्थ-जातमभिधेय-भूतं, तस्य अभिधानाव्यति-रेकात्, अभिधानस्य च ओङ्काराव्यतिरेकाद् ओङ्कार एव इदं सर्वम्।

परं च ब्रह्म अभिधानाभिधेयोपाय-पूर्वकमेव गम्यते इति ओङ्कार एव।

तस्य एतस्य परापर-ब्रह्म-रूपस्य अक्षरस्य ओमित्येतस्य उपव्याख्यानम्।

ब्रह्म-प्रतिपत्त्युपायत्वाद् ब्रह्म-समीपतया विस्पष्टं प्रकथनम् उपव्याख्यानं प्रस्तुतं वेदितव्यमिति वाक्य-शेषः।

भूतं भवद्भविषयदिति काल-त्रय-परिच्छेद्यं यत्तदपि ओङ्कार एव उक्त-न्यायतः।

यच्च अन्यत् त्रिकालातीतं कार्याधिगम्यं कालापरिच्छेद्यम् अव्याकृतादि तदपि ओङ्कार एव।। १ ।।

अभिधानाभिधेययोरेकत्वेऽपि अभिधान-प्राधान्येन निर्देशः कृतः ओमित्येतदक्षरमिदं सर्वम् इत्यादि।

अभिधान-प्राधान्येन निर्दिष्टस्य पुनः अभिधेय-प्राधान्येन निर्देशः अभिधानाभिधेययोरेकत्व-प्रतिपत्त्यर्थः।

इतरथा हि अभिधान-तन्त्राभिधेय-प्रतिपत्तिः इति, अभिधेयस्य अभिधानत्वं गौणम् इत्याशङ्का स्यात्।

एकत्व-प्रतिपत्तेः च प्रयोजनम् अभिधानाभिधेययोः एकेनैव प्रयत्नेन युगपत् प्रविलापयन् तद्विलक्षणं ब्रह्म प्रतिपद्येत इति। तथा च वक्ष्यति पादा मात्रा मात्राश्च पादाः (मा. ८) इति।

तदाह -

**सर्वं ह्येतद् ब्रह्म। अयमात्मा ब्रह्म। सोऽयमात्मा चतुष्पात्।। २ ।।**

एतद् सर्वं ब्रह्म हि । अयम् आत्मा ब्रह्म। सः अयम् आत्मा चतुष्पात्। २।

एतद् सर्वम् - all this; ब्रह्म हि - is indeed Brahman; अयम् आत्मा - this self; ब्रह्म - is Brahman; सः - which is that Brahman अयम् आत्मा - this self; चतुष्पात् - is endowed with four quarters.

सर्वं ह्येतद् ब्रह्म इति। सर्वं यदुक्तमोङ्कारमात्रमिति तद् एतद् ब्रह्म।

तच्च ब्रह्म परोक्षाभिहितं प्रत्यक्षतः विशेषेण निर्दिशति - अयमात्मा ब्रह्म इति।

अयमिति चतुष्पात्वेन प्रविभज्यमानं प्रत्यगात्मतया अभिनयेन निर्दिशति - अयमात्मेति।

सोयमात्मा ओङ्काराभिधेयः परापरत्वेन व्यवस्थितः चतुष्पात् कार्षापणवद् न गौरिव इति।

त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिः इति करण-साधनः पाद-शब्दः।

तुरीयस्य पद्यते इति कर्मसाधनः पादशब्दः।। २।

कथं चतुष्पात्वमिति। आह -

**जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः**

**प्रथमः पादः।। ३ ।।**

(अस्य आत्मनः) प्रथमः पादः जागरितस्थानः बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः।। ३

जागरितस्थानः - whose field is the waking state; बहिष्प्रज्ञः - whose consciousness is eternal; सप्ताङ्गः - who has seven limbs; एकोनविंशतिमुखः - who has nineteen instruments; स्थूलभुग् - who is the experiencer of gross objects; वैश्वानरः - is vaisvanara; प्रथमः पादः - the first quarter

जागरितं स्थानमस्येति जागरितस्थानः।

बहिष्प्रज्ञः स्वात्म-व्यतिरिक्ते विषये प्रज्ञा यस्य स बहिष्प्रज्ञः, बहिर्विषया इव प्रज्ञा अविद्याकृताऽवभासते

इत्यर्थः।

तथा सप्ताङ्गानि अस्य तस्य ह वा एतस्य आत्मनः वैश्वानरस्य मूर्धैव सुतेजाः, चक्षुर्विश्वरूपः, प्राणः पृथग्वर्त्मात्मा, सन्देहः बहुलः, बस्तिरेव रयिः, पृथिव्येव पादौ (छा. ५.१८.२) इत्यग्निहोत्र-कल्पना-शेषत्वेन आहवनीयोऽग्निः अस्य मुखत्वेन उक्तः इत्येवं सप्त अङ्गानि यस्य सः सप्ताङ्गः।

तथा एकोनविंशतिः मुखानि अस्य। बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश, वायवश्च प्राणादयः पञ्च, मनो बुद्धिरहङ्कारश्चित्तमिति मुखानि इव मुखानि तानि उपलब्धि-द्वाराणीत्यर्थः।

सः एवं-विशिष्टः वैश्वानरः यथोक्तैः द्वारैः शब्दादीन् स्थूलान् विषयान् भुङ्क्ते इति स्थूलभुक्।

विश्वेषां नराणामनेकधा नयनाद् वैश्वानरः। यद्वा विश्वश्चासौ नरश्चेति विश्वानरः। विश्वानरः एव वैश्वानरः।

सर्वपिण्डात्मानन्यत्वात्। सः प्रथमः पादः। एतत्पूर्वकत्वाद् उत्तर-पादाधिगमस्य प्राथम्यम् अस्य।

आक्षेपः कथम् अयमात्मा ब्रह्म इति प्रत्यगात्मनः अस्य चतुष्पात्त्वे प्रकृते, द्यु-लोकादीनां मूर्धाद्यङ्गत्वमिति।

समाधानम् नैष दोषः। सर्वस्य प्रपञ्चस्य साधिदैविकस्य अनेनात्मना चतुष्पात्त्वस्य विवक्षिततत्वात्।

एवं च सति सर्व-प्रपञ्चोपशमे अद्वेत-सिद्धिः।

सर्वभूतस्थश्च आत्मा एकः दृष्टः स्यात्, सर्वभूतानि च आत्मनि।

यस्तु सर्वाणि भूतानि (ई. ६) इत्यादि-श्रुत्यर्थः उपसंहृतश्च एवं स्यात्।

अन्यथा हि स्व-देह-परिच्छिन्नः एव प्रत्यगात्मा साङ्ख्यादिभिः इव दृष्टः स्यात्।

तथा च सति अद्वैतमिति श्रुति-कृतः विशेषो न स्यात्, साङ्ख्यादि-दर्शनेन अविशेषात्।

इष्यते च सर्वोपनिषदां सर्वात्मैक्य-प्रतिपादकत्वम्। अतो युक्तमेव अस्य आध्यात्मिकस्य पिण्डात्मनः धु-

लोकाद्यङ्गत्वेन विराडात्मना आधिदैविकेन एकत्वमभिप्रेत्य सप्ताङ्गत्व-वचनम्।

मूर्धा ते व्यपतिष्यत् (यन्मां नागमिष्ये) (छा. ५.१२.२) इत्यादि-लिङ्ग-दर्शनाच्च।

विराजा एकत्वम् उपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनोः।

उक्तं चैतद् मधु-ब्राह्मणे यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः यश्चायम् अध्यात्मम् (बृ. २.५.१)

इत्यादि।

सुषुप्ताव्याकृतयोः तु एकत्वं सिद्धमेव निर्विशेषत्वात्। एवं च सति एतत्सिद्धं भविष्यति सर्वद्वैतोपशमे च

अद्वैतमिति।। ३ ।।

**स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो**

**द्वितीयः पादः।। ४ ।।**

(अस्य आत्मनः) द्वितीयः पादः स्वप्नस्थानः अन्तःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुग् तैजसः।। ३

स्वप्नस्थानः - whose field is the dream state; अन्तःप्रज्ञः - whose consciousness is internal; सप्ताङ्गः - who has seven limbs; एकोनविंशतिमुखः - who has nineteen instruments; प्रविविक्तभुग् - who is the experiencer of subtle objects; तैजसः - is taijasa; द्वितीयः पादः - the second quarter

स्वप्नः स्थानम् अस्य तैजसस्य स्वप्नस्थानः।

जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषया इव अवभासमाना मनः-स्पन्दन-मात्रा सती तथा-भूतं संस्कारं मनसि आधत्ते। तन्मनः तथा संस्कृतं चित्रितः इव पटः बाह्य-साधनानपेक्षम् अविद्या-काम-कर्मभिः प्रेर्यमाणं जाग्रद्वद् अवभासते। तथा चोक्तम् अस्य लोकस्य सर्वावतः मात्राम् अपादाय (बृ. ४.३.९) इति।

तथा परे देवे मनस्येकीभवति (प्र. ४.२) इति प्रस्तुत्य अत्रैष देवः स्वप्ने महिमानम् अनुभवति (प्र. ४.५)

इत्याथर्वणे। इन्द्रियापेक्षया अन्तःस्थत्वान्मनसः तद्वासना-रूपा च स्वप्ने प्रज्ञा यस्य इति अन्तःप्रज्ञः।

विषयशून्यायां प्रज्ञायां केवल-प्रकाश-स्वरूपायां विषयित्वेन भवति इति तैजसः।

विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलायाः भोज्यत्वम्।

इह पुनः केवला वासना-मात्रा प्रज्ञा भोज्येति प्रविविक्तः भोगः इति।

समानमन्यत्। द्वितीयः पादः तैजसः।। ४ ।।

**अवतरणभाष्यम्**

दर्शनादर्शन-वृत्त्योः तत्त्वाप्रबोध-लक्षणस्य स्वापस्य तुल्यत्वाद् सुषुप्ति-ग्रहणार्थं यत्र सुप्तः इत्यादि-विशेषणम्।

अथवा त्रिष्वपि स्थानेषु तत्त्वाप्रतिबोध-लक्षणः स्वापः अविशिष्टः इति पूर्वाभ्यां[५.२] सुषुप्तं विभजते

## यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्।

## सुषुप्तस्थानः एकीभूतः प्रज्ञानघनः एवाऽऽनन्दमयो ह्यानन्दभुक् चेतोमुखः

## प्राज्ञस्तृतीयः पादः।। ५ ।।

यत्र सुप्तः न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थानः एकीभूतः प्रज्ञानघनः एव आनन्दमयः ह्यानन्दभुक् चेतोमुखः प्राज्ञः तृतीयः पादः।। ५

यत्र सुप्तः - न - कञ्चन कामं - कामयते - न - कञ्चन स्वप्नं - पश्यति - तत्सुषुप्तम् सुषुप्तस्थानः - एकीभूतः - प्रज्ञानघनः एव - आनन्दमयः - ह्यानन्दभुक् - चेतोमुखः - प्राज्ञः - तृतीयः पादः

यत्र यस्मिन् स्थाने काले वा सुप्तः न कञ्चन स्वप्नं पश्यति न कञ्चन कामं कामयते।

न हि सुषुप्ते पूर्वयोः इव अन्यथा-ग्रहण-लक्षणं स्वप्न-दर्शनं कामो वा कश्चन विद्यते।

तद् एतत् सुषुप्तं स्थानमस्येति सुषुप्तस्थानः। स्थान-द्वय-प्रविभक्तं मनः-स्पन्दितं[३.१] द्वैत-जातं तथा-रूपापरित्यागेन अविवेकापन्नं, नैश-तमो-ग्रस्तम् इव अहः सप्रपञ्चकम्, एकीभूतम् इत्युच्यते। अत एव [७.२]स्वप्नजाग्रन्मनः[३.१]-स्पन्दनानि प्रज्ञानानि घनी-भूतानि इव सेयमवस्था अविवेकरूपत्वाद् प्रज्ञान[६.३]-घनः उच्यते। यथा रात्रौ नैशेन तमसा अविभज्यमानं सर्वं घनम् इव तद्वत् प्रज्ञान-घनः एव। एव-शब्दान्न जात्यन्तरं प्रज्ञान-व्यतिरेकेण अस्तीत्यर्थः।

मनसः विषय-विषय्याकार-स्पन्दनायास-दुःखाभावाद् आनन्दमयः आनन्द-प्रायः।

न आनन्द एव, अनात्यन्तिकत्वात्। यथा लोके निरायास-स्थितः सुखी आनन्दभुग् उच्यते।

अत्यन्तानायास-रूपा हि इयं स्थितिरनेनानुभूयते इत्यानन्दभुक्।

एषोऽस्य परमः आनन्दः (बृ ४.३.३२) इति श्रुतेः।

स्वप्नादि-प्रतिबोध-चेतः[२.१] द्वारी-भूतत्वात् चेतोमुखः।

बोध-लक्षणं वा चेतो द्वारं मुखमस्य स्वप्नाद्यागमनं प्रति इति चेतोमुखः।

भूत-भविष्यद्-ज्ञातृत्वं सर्व-विषय-ज्ञातृत्वमस्य एव इति प्राज्ञः।

सुषुप्तोऽपि भूत-पूर्व-गत्या प्राज्ञ उच्यते। अथवा प्रज्ञप्ति-मात्रम् अस्यैव असाधारणं रूपमिति प्राज्ञः।

इतरयोः विशिष्टमपि विज्ञानमस्ति। सोऽयं प्राज्ञः तृतीयः पादः।। ५ ।।

## एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः

## सर्वस्य प्रभवाप्ययौ हि भूतानाम्।। ६ ।।

एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी एष भूतानाम् योनिः (एषः) हि सर्वस्य प्रभवाप्ययौ । ६

एषः हि स्वरूपावस्थः सर्वेश्वरः साधिदैविकस्य भेद-जातस्य सर्वस्य ईशिता।

न एतस्माज्ञात्यन्तर-भूतः, अन्येषां यथा। प्राण-बन्धनं हि सौम्य मनः (छा. ६.८.२) इति श्रुतेः।

अयमेव हि सर्वस्य सर्व-भेदावस्थः ज्ञाता इति एषः सर्वज्ञः। एषः अन्तर्यामी अन्तरनुप्रविश्य सर्वेषां भूतानां

नियन्ता अप्येष एव। अत एव यथोक्तं सभेदं जगत् प्रसूयते इति एषः योनिः सर्वस्य।

यत एवं प्रभवश्च अप्ययश्च प्रभवाप्ययौ हि भूतानाम् एष एव।। ६ ।।

## कारिका:

अत्र एते श्लोकाः भवन्ति।

**बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।**

**घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ।। १.१ ।।**

एकः एव विभुः बहिष्प्रज्ञः हि विश्वः, अन्तःप्रज्ञः तु तैजसः, तथा घनप्रज्ञः प्राज्ञः (इति) त्रिधा स्मृतः।। १ ।।

बहिष्प्रज्ञ इति। पर्यायेण त्रिस्थानत्वात्, सोऽहमिति स्मृत्या प्रतिसन्धानाच्च, स्थान-त्रय-व्यतिरिक्तत्वम् एकत्वं

शुद्धत्वमसङ्गत्वं च सिद्धमित्यभिप्रायः। महामत्स्यादि-दृष्टान्त-श्रुतेः (बृ. ४.३.१८)।। १ ।।

**दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।**

**आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ।। १.२ ।।**

(एकः एव विभुः) विश्वः दक्षिणाक्षिमुखे, तैजसः तु मनसि अन्तः, प्राज्ञः च हृदि आकाशे (इति) देहे त्रिधा व्यवस्थितः।। २

दक्षिणाक्षीति। दक्षिणम् अक्ष्येव मुखम्, तस्मिन्प्राधान्येन द्रष्टा स्थूलानां विश्वः अनुभूयते।

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः(बृ. ४.२.२) इति श्रुतेः। इन्धो दीप्ति-गुणो वैश्वानरः।

आदित्यान्तर्गतो वैराज आत्मा चक्षुषि च द्रष्टैकः।

आक्षेपः नन्वन्यो हिरण्यगर्भः, क्षेत्रज्ञो दक्षिणेऽक्षिण्यक्ष्णोर्नियन्ता द्रष्टा चान्यो देह-स्वामी।

समाधानम् न, स्वतो भेदानभ्युपगमात्।

एको देवः सर्वभूतेषु गूढः (श्वे. ६.११) इति श्रुतेः, क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत(गी. १३.२),

अविभक्तं च भूतेषु विभक्तम् इव च स्थितम् (गी. १३.१६) इति स्मृतेश्च।

सर्वेषु करणेष्वविशेषेऽपि दक्षिणाक्षिण्युपलब्धि-पाटव-दर्शनात् तत्र विशेषेण निर्देशोऽस्य विश्वस्य।

दक्षिणाक्षिगतो रूपं दृष्ट्वा निमीलिताक्षस्तदेव स्मरन् मनस्यन्तः स्वप्न इव तदेव वासनारूपाभिव्यक्तं पश्यति।

यथा अत्र तथा स्वप्ने। अतः मनसि अन्तस्तु तैजसः अपि विश्व एव।

आकाशे च हृदि स्मरणाख्य-व्यापारोपरमे प्राज्ञः एकीभूतो घन-प्रज्ञ एव भवति, मनो-व्यापाराभावात्।

दर्शन-स्मरणे एव हि मनः-स्पन्दिते। तदभावे हृद्येवाविशेषेण प्राणात्मनावस्थानम्।

प्राणो ह्येवैतान्सर्वान्संवृङ्क्ते (छा ४.३.३.) इति श्रुतेः। तैजसः हिरण्यगर्भः, मनःस्थत्वात्।

लिङ्गं मनः (बृ. ४.४.६) मनोमयोऽयं पुरुषः (बृ. ५.६.१) इत्यादि-श्रुतिभ्यः।

आक्षेपः ननु, व्याकृतः प्राणः सुषुप्ते। तदात्मकानि करणानि भवन्ति। कथमव्याकृतता

**सुषुप्ते प्राणानामव्याकृतत्वम्**

समाधानम् नैष दोषः। अव्याकृतस्य देश-काल-विशेषाभावात्।

यद्यपि प्राणाभिमाने सति व्याकृततैव प्राणस्य, तथापि पिण्ड-परिच्छिन्न-विशेषाभिमान-निरोधः प्राणे

भवतीत्यव्याकृत एव प्राणः सुषुप्ते परिच्छिन्नाभिमानवताम्।

यथा प्राण-लये परिच्छिन्नाभिमानिनां प्राणोऽव्याकृतः तथा प्राणाभिमानिनोऽप्यविशेषापत्तौ अव्याकृतता समाना,

प्रसव-बीजात्मकत्वं च। तदध्यक्षश्चैकः अव्याकृतावस्थः। परिच्छिन्नाभिमानिनामध्यक्षाणां च तेनैकत्वमिति

पूर्वोक्तं विशेषणम् एकीभूतः प्रज्ञानघनः (मन्त्रः ६) इत्याद्युपपन्नम्। तस्मिन्नेतस्मिन्नुक्त-हेतु-सत्त्वाच्च।

आक्षेपः कथं प्राण-शब्दत्वमव्याकृतस्य

समाधानम् प्राणबन्धनं हि सोम्य मनः (छा. ६.८.२) इति श्रुतेः।

आक्षेपः ननु, तत्र सदेव सोम्य (छा. ६.२.१) इति प्रकृतं सद् ब्रह्म प्राण-शब्द-वाच्यम्।

**प्राणशब्दस्य सबीज-सत्परत्वम्**

समाधानम् नैष दोषः, बीजात्मकत्वाभ्युपगमात्सतः। यद्यपि सद्ब्रह्म प्राण-शब्द-वाच्यं तत्र, तथापि जीव-प्रसव-बीजात्मकत्वमपरित्यज्यैव प्राण-शब्दत्वं सतः, सच्छब्द-वाच्यता च।

यदि हि निर्बीज-रूपं विवक्षितं ब्रह्माभविष्यत्, नेति नेति (बृ. ४.४.२२, ४.५.१५) यतो वाचो निवर्तन्ते(तै. २.९) अन्यदेव तद्विदितादथो अविदितादधि (के. १.३) इत्यवक्ष्यत्। न सत्तन्नासदुच्यते (गी. १३.१२) इति स्मृतेः। निर्बीजतयैव चेत्, सति प्रलीनानां सम्पन्नानां सुषुप्ति-प्रलययोः पुनरुत्थानानुपपत्तिः स्यात्।

मुक्तानां च पुनरुत्पत्ति-प्रसङ्गः, बीजाभावाविशेषात्। ज्ञान-दाह्य-बीजाभावे च ज्ञानानर्थक्य-प्रसङ्गः।

तस्मात् सबीजत्वाभ्युपगमेनैव सतः प्राणत्व-व्यपदेशः, सर्व-श्रुतिषु च कारणत्व-व्यपदेशः।

अत एव अक्षरात्परतः परः (मु. २.१.२) स बाह्याभ्यन्तरो ह्यजः (मु. २.१.२) यतो वाचो निवर्त्तन्ते (तै. २.९) नेति नेति (बृ. ४.४.२२) इत्यादिना बीजवत्त्वापनयनेन व्यपदेशः।

तामबीजावस्थां तस्यैव प्राज्ञ-शब्द-वाच्यस्य तुरीयत्वेन देहादि-सम्बन्ध-जाग्रदादि-रहितां पारमार्थिकीं पृथग्वक्ष्यति।

बीजावस्थापि न किञ्चिदवेदिषम् इत्युत्थितस्य प्रत्यय-दर्शनाद्देहेऽनुभूयत एवेति त्रिधा देहे व्यवस्थितः इत्युच्यते।। २ ।।

**विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।**

**आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ।। १.३ ।।**

विश्वः हि नित्यं स्थूलभुग् । तैजसः (नित्यं) प्रविविक्तभुक्। तथा प्राज्ञः (नित्यं) आनन्दभुक् (इति) त्रिधा भोगं निबोधत।। ३

उक्तार्थौ हि श्लोकौ।। ३-४ ।।

**स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् ।**

**आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ।। १.४ ।।**

स्थूलं (विषयम्) विश्वं तर्पयते। प्रविविक्तं तु तैजसं (तर्पयते)। तथा आनन्दः च प्राज्ञं (तर्पयते) (इति) तृप्तिं त्रिधा निबोधत।। ४

**त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्त्तितः ।**

**वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ।। १.५ ।।**

त्रिषु धामसु यद् भोज्यम् (इति प्रकीर्त्तितम्) यः च भोक्ता (इति) प्रकीर्त्तितः एतद् उभयं यः तु वेद सः भुञ्जानः (अपि सन्) न लिप्यते।। ५

त्रिषु धामसु जाग्रदादिषु स्थूल-प्रविविक्तानन्दाख्यं यद्भोज्यम् एकं त्रिधा-भूतम्। यश्च विश्व-तैजस-प्राज्ञाख्यो भोक्ता एकः, सोऽहम् इत्येकत्वेन प्रतिसन्धानात्, द्रष्टृत्वाविशेषाच्च प्रकीर्त्तितः। यो वेद एतदुभयं भोज्य-भोक्तृतया अनेकधा भिन्नं, सः भुञ्जानः न लिप्यते, भोज्यस्य सर्वस्य एकस्य भोक्तुः भोज्यत्वात्। न हि यस्य यो विषयः, सः तेन हीयते वर्धते वा। न हि अग्निः स्व-विषयं दग्ध्वा काष्ठादि, तद्वत्।। ५ ।।

**प्रभवः सर्वभावानां सतामिति विनिश्चयः।**

**सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक्।। १.६ ।।**

सताम् सर्वभावानां प्रभवः इति विनिश्चयः। प्राणः सर्वं जनयति। पुरुषः पृथक् चेतोंशून् (जनयति)।। ६

सतां विद्यमानानां स्वेन अविद्या-कृत-नाम-रूप-माया-स्वरूपेण सर्वभावानां विश्व-तैजस-प्राज्ञ-भेदानां प्रभवः

उत्पत्तिः। वक्ष्यति च - वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते (मा.का. ३.२८) इति।

यदि हि असतामेव जन्म स्यात्, ब्रह्मणोऽव्यवहार्यस्य ग्रहणद्वाराभावादसत्त्व-प्रसङ्गः।

दृष्टं च रज्जु-सर्पादीनाम् अविद्या-कृत-माया-बीजोत्पन्नानां रज्ज्वाद्यात्मना सत्त्वम्।

न हि निरास्पदा रज्जु-सर्प-मृगतृष्णिकादयः क्वचिदुपलभ्यन्ते केनचित्।

यथा रज्ज्वां प्राक्सर्पोत्पत्तेः रज्ज्वात्मना सर्पः सन्नेवासीत्, एवं सर्व-भावानामुत्पत्तेः प्राक्प्राण-बीजात्मनैव सत्त्वम्।

इत्यतः श्रुतिरपि वक्ति ब्रह्मैवेदम् (मु. २.२.११) आत्मैवेदमग्र आसीत् (बृ. १.४.१) इति।

सर्वं जनयति प्राणः। चेतोंशून् अंशव इव रवेः चिदात्मकस्य पुरुषस्य चेतो-रूपाः जलार्क-समाः प्राज्ञ-तैजस-विश्व-भेदेन देव-मनुष्य-तिर्यगादि-देह-भेदेषु विभाव्यमानाः चेतोंशवो ये, तान् पुरुषः पृथक् सृजति विषय-भाव-विलक्षणान् अग्नि-विस्फुलिङ्गवत् सलक्षणान् जलार्कवच्च जीव-लक्षणान्।

तु इतरान् सर्व-भावान् प्राणो बीजात्मा जनयति, यथोर्णनाभिः(मु. १.१.७) यथाग्नेः क्षुद्रा विस्फुलिङ्गाः (बृ. २.१.२०) इत्यादि-श्रुतेः।। ६ ।।

यदि हि असतामेव जन्म स्याद् ब्रह्मणः अव्यवहार्यस्य ग्रहणद्वाराभावाद् असत्वप्रसङ्गः दृष्टं च रज्जुसर्पादीनाम्

अविद्याकृतमायाबीजोत्पन्नानां रज्ज्वाद्यात्मना सत्वम् न हि निरास्पदाः रज्जुसर्पमृगतृष्णिकादयः क्वचिद्

उपलभ्यन्ते केनचित्।

**विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः।**

**स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता।। १.७ ।।**

अन्ये सृष्टिचिन्तकाः तु प्रसवं विभूतिं मन्यन्ते। अन्यैः सृष्टिः स्वप्नमायासरूपा इति विकल्पिता।। ७

विभूतिः विस्तारः ईश्वरस्य सृष्टिरिति सृष्टिचिन्तकाः मन्यन्ते न तु परमार्थ-चिन्तकानां सृष्टावादरः इत्यर्थः।

इन्द्रो मायाभिः पुरुरूप ईयते (बृ. २.५.१९) इति श्रुतेः। न हि मायाविनं सूत्रमाकाशे निक्षिप्य तेन सायुधमारुह्य चक्षुर्गोचरताम् अतीत्य युद्धेन खण्डशः छिन्नं पतितं पुनरुत्थितं च पश्यतां तत्कृत-मायादि-सतत्त्व-चिन्तायामादरो भवति। तथैवायं मायाविनः सूत्र-प्रसारण-समः सुषुप्त-स्वप्नादि-विकासः, तदारूढ-मायावि-समश्च तत्स्थः प्राज्ञ-तैजसादिः। सूत्र-तदारूढाभ्यामन्यः परमार्थ-मायावी। स एव भूमिष्ठः मायाच्छन्नोऽदृश्यमान एव स्थितो यथा, तथा तुरीयाख्यं परमार्थ-तत्त्वम्। अतस्तच्चिन्तायामेव आदरो मुमुक्षूणाम् आर्याणाम्, न निष्प्रयोजनायां सृष्टावादरः इत्यतः सृष्टि-चिन्तकानामेवैते विकल्पाः इत्याह - स्वप्न-मायासरूपेति। स्वप्न-सरूपा माया-सरूपा च इति।। ७ ।।

**इच्छामात्रं प्रभोः सृष्टिः इति सृष्टौ विनिश्चिताः ।**

**कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ।। १.८ ।।**

सृष्टिः प्रभोः इच्छामात्रम् इति (अन्ये) सृष्टौ विनिश्चिताः (मन्यन्ते)। कालचिन्तकाः भूतानां कालात् प्रसूतिं मन्यन्ते ।। ८

इच्छामात्रं प्रभोः सत्य-सङ्कल्पत्वात् सृष्टिः घटादिः सङ्कल्पना-मात्रम्, न सङ्कल्पनातिरिक्तम्।

कालादेव सृष्टिरिति केचित्।। ८ ।।

**भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।**

**देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ।। १.९ ।।**

सृष्टिः भोगार्थम् इति अन्ये (मन्यन्ते)। क्रीडार्थमिति चापरे (मन्यन्ते)। आप्तकामस्य का स्पृहा (इति न्यायात्) एषः अयं देवस्य स्वभावः (इति अन्ये मन्यन्ते) । ९

भोगार्थम्, क्रीडार्थमिति च अन्ये सृष्टिं मन्यन्ते।

अनयोः पक्षयोर्दूषणं देवस्यैषः स्वभावोऽयम् इति देवस्य स्वभाव-पक्षमाश्रित्य।

सर्वेषां वा पक्षाणाम् - आप्तकामस्य का स्पृहा इति।

न हि रज्ज्वादीनामविद्या-स्वभाव-व्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुम्।। ९ ।।

चतुर्थः पादः क्रमप्राप्तः वक्तव्यः इति आह -

**नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्।**

**अदृष्टम् अव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं**

**प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।। ७ ।।**

न अन्तःप्रज्ञं न बहिष्प्रज्ञं न उभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टम् अव्यहार्यम् अग्राह्यम् अलक्षणम् अचिन्त्यम् अव्यपदेश्यम् एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।। ७

न अन्तःप्रज्ञमित्यादिना।

सर्व-शब्द-प्रवृत्ति-निमित्त-शून्यत्वात् तस्य शब्दानभिधेयत्वम् इति विशेष-प्रतिषेधेनैव च तुरीयं निर्दिदिक्षति।

आक्षेपः शून्यमेव तर्हि तत्। समाधानम् न। मिथ्या-विकल्पस्य निर्निमित्तत्वानुपपत्तेः।

न हि रजत-सर्प-पुरुष-मृगतृष्णिकादि-विकल्पाः शुक्तिका-रज्जु-स्थाणूषरादि-व्यतिरेकेणावस्त्वास्पदाः शक्याः

कल्पयितुम्। आक्षेपः एवं तर्हि प्राणादि-सर्व-विकल्पास्पदत्वात् तुरीयस्य शब्द-वाच्यत्वम् इति, न प्रतिषेधैः

प्रत्याय्यत्वम्, उदकाधारादेः इव घटादेः।

समाधानम् न, प्राणादि-विकल्पस्य असत्वाच्छुक्तिकादिषु इव रजतादेः।

न हि सदसतोः सम्बन्धः शब्द-प्रवृत्ति-निमित्त-भाग्, अवस्तुत्वात्।

नापि प्रमाणान्तर-विषयत्वं स्वरूपेण गवादिवत्। आत्मनः निरुपाधिकत्वात्।

गवादिवन्नापि जातिमत्वम्, अद्वितीयत्वेन सामान्य-विशेषाभावात्।

नापि क्रियावत्वं पाचकादिवत्, अविक्रियत्वात्।

नापि गुणवत्त्वम् नीलादिवत्, निर्गुणत्वात्। अतः नाभिधानेन निर्देशमर्हति।

आक्षेपः शश-विषाणादि-समत्वाद् निरर्थकत्वं तर्हि।

समाधानम् न। आत्मत्वावगमे तुरीयस्य अनात्म-तृष्णा-व्यावृत्ति-हेतुत्वात्, शुक्तिकावगमे इव रजत-तृष्णायाः।

न हि तुरीयस्य आत्मत्वावगमे सति अविद्या-तृष्णादि-दोषाणां सम्भवोऽस्ति। न च तुरीयस्य आत्मत्वानवगमे कारणमस्ति। सर्वोपनिषदां तादर्थ्येन उपक्षयात्। तत्त्वमसि (छा. ६.८.७) अयमात्मा ब्रह्म(मा. १.२ बृ. २.५.१९) तत्सत्यं स आत्मा (छा. ६.८.१६) यत्साक्षाद् अपरोक्षाद् ब्रह्म (बृ. ३.४.१) स बाह्याभ्यन्तरो ह्यजः

(मु. २.१.२) आत्मैवेदं सर्वम् (छा. ७.२५.२) इत्यादीनाम्। सोऽयमात्मा परमार्थापरमार्थ-रूपः चतुष्पाद्

इत्युक्तः। तस्य अपरमार्थ-रूपमविद्या-कृतं रज्जु-सर्पादि-समम् उक्तं पाद-त्रय-लक्षणं बीजाङ्कुर-स्थानीयम्।

अथेदानीम् अबीजात्मकं परमार्थ-स्वरूपं रज्जु-स्थानीयं सर्पादि-स्थानीयोक्त-स्थान-त्रय-निराकरणेन आह -

नान्तःप्रज्ञमित्यादि।

आक्षेपः ननु आत्मनः चतुष्पात्त्वं प्रतिज्ञाय पाद-त्रय-कथनेनैव चतुर्थस्य अन्तः-प्रज्ञादिभ्यः अन्यत्वे सिद्धे

नान्तःप्रज्ञम् इत्यादि-प्रतिषेधोऽनर्थकः।

समाधानम् न। सर्पादि-विकल्प-प्रतिषेधेनैव रज्जु-स्वरूप-प्रतिपत्तिवत् त्र्यवस्थस्य एव आत्मनः तुरीयत्वेन

प्रतिपिपादयिषितत्वात्, तत्त्वमसि (छा. ६.८.७) इतिवत्। यदि हि त्र्यवस्थात्म-विलक्षणं तुरीयमन्यत्, तत्प्रतिपत्ति-द्वाराभावात् शास्त्रोपदेशानर्थक्यं शून्यतापत्तिः वा।

रज्जुः इव सर्पादिभिः विकल्प्यमानाः, स्थान-त्रयेऽपि आत्मा एक एव अन्तःप्रज्ञादित्वेन विकल्प्यते यदा, तदा अन्तःप्रज्ञादित्व-प्रतिषेध-विज्ञान-प्रमाण-सम-कालमेव आत्मनि अनर्थ-प्रपञ्च-निवृत्ति-लक्षण-फलं परिसमाप्तम् इति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम्। रज्जु-सर्प-विवेक-सम-काले इव रज्ज्वां सर्प-निवृत्ति-फले सति रज्ज्वधिगमस्य।येषां पुनः तमोऽपनय-व्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते तेषां छेद्यावयव-सम्बन्ध-वियोग-व्यतिरेकेण अन्यतरावयवेऽपि च्छिदिः व्याप्रियते इत्युक्तं स्यात्।

यदा पुनः घट-तमसोः विवेक-करणे प्रवृत्तं प्रमाणम् अनुपादित्सित-तमो-निवृत्ति-फलावसानं, छिदिः इव च्छेद्यावयव-सम्बन्ध-विवेक-करणे प्रवृत्ता तदवयव-द्वैधी-भाव-फलावसना, तथा नान्तरीयकं घट-विज्ञानं, न तत्प्रमाणफलम्। न च तद्वदपि आत्मनि अध्यारोपितान्तः-प्रज्ञत्वादि-विवेक-करणे प्रवृत्तस्य प्रतिषेध-विज्ञान-प्रमाणस्य अनुपादित्सितान्तः-प्रज्ञत्वादि-निवृत्ति-व्यतिरेकेण तुरीये व्यापारोपपत्तिः। अन्तःप्रज्ञत्वादि-निवृत्ति-सम-कालम् एव प्रमातृत्वादि-भेद-निवृत्तेः। तथा च वक्ष्यति ज्ञाते द्वैतं न विद्यते (का. १.१८) इति। ज्ञानस्य द्वैत-निवृत्ति-क्षण-व्यतिरेकेण क्षणान्तरानवस्थानात्। अवस्थाने च अनवस्था-प्रसङ्गाद् द्वैतानिवृत्तेः। तस्मात् प्रतिषेध-विज्ञान-प्रमाण-व्यापार-सम-कालैव आत्मनि अध्यारोपितान्तः-प्रज्ञत्वाद्यनर्थ-निवृत्तिः इति सिद्धम्।

नान्तःप्रज्ञम् इति तैजस-प्रतिषेधः। न बहिष्प्रज्ञम् इति विश्व-प्रतिषेधः।

नोभयतःप्रज्ञम् इति जाग्रत्स्वप्नयोः अन्तरालावस्था-प्रतिषेधः।

न प्रज्ञानघनम् इति सुषुप्तावस्था-प्रतिषेधः, बीजभावाविवेकरूपत्वात्।

न प्रज्ञम् इति युगपत् सर्व-विषय-प्रज्ञातृत्व-प्रतिषेधः। नाप्रज्ञम् इति अचैतन्य-प्रतिषेधः। आक्षेपः कथं पुनः

अन्तःप्रज्ञत्वादीनाम् आत्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत् प्रतिषेधात् असत्वं गम्यते इति।

समाधानम् उच्यते। ज्ञ-स्वरूपाविशेषेऽपि इतरेतर-व्यभिचारात्, रज्ज्वादौ इव सर्प-धारादि-विकल्पित-भेदवत्,

सर्वत्र अव्यभिचाराद् ज्ञ-स्वरूपस्य सत्यत्वम्।

आक्षेपः सुषुप्ते व्यभिचरति इति चेत्।

समाधानम् न। सुषुप्तस्य अनुभूयमानत्वात्। न हि विज्ञातुः विज्ञातेः विपरिलोपो विद्यते (बृ. ४.३.३०) इति

श्रुतेः।

अत एव अदृष्टम्। यस्माददृष्टं तस्माद् अव्यवहार्यम्। अग्राह्यं कर्मेन्द्रियैः। अलक्षणम् अलिङ्गम् इत्येतत्।

अननुमेयमित्यर्थः। अत एव अचिन्त्यम्। अत एव अव्यपदेश्यं शब्दैः।

एकात्मप्रत्ययसारं जाग्रदादि-स्थानेषु एकोऽयमात्मा इत्यव्यभिचारी यः प्रत्ययः तेन अनुसरणीयम्।

अथवा एकः आत्म-प्रत्ययः सारं प्रमाणं यस्य तुरीयस्याधिगमे तत्तुरीयमेकात्म-प्रत्यय-सारम्।

आत्मेत्येवोपासीत (बृ. १.४.७) इति श्रुतेः।

अन्तः-प्रज्ञत्वादि-स्थानि-धर्म-प्रतिषेधः कृतः। प्रपञ्चोपशमम् इति जाग्रदादि-स्थान-धर्माभावः उच्यते।

अत एव शान्तम् अविक्रियम्। शिवम् यतः अद्वैतम्, भेद-विकल्प-रहितम्।

चतुर्थं तुरीयं मन्यन्ते प्रतीयमान-पाद-त्रय-रूप-वैलक्षण्यात्। स आत्मा स विज्ञेयः इति प्रतीयमान-सर्प-

भूच्छिद्र-दण्डादि-व्यतिरिक्ता यथा रज्जुः तथा तत्त्वमसि इत्यादि-वाक्यार्थः आत्मा अदृष्टो द्रष्टा, (बृ. ३.७.२३)

न हि द्रष्टुः दृष्टेः विपरिलोपो विद्यते (बृ. ४.३.२३) इत्यादिभिः उक्तः यः, सः विज्ञेयः इति भूत-पूर्व-गत्या,

ज्ञाते द्वैताभावः।। ७ ।।

अत्रैते श्लोका भवन्ति -

**निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।**

**अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ।। १.१० ।।**

सर्वदुःखानां निवृत्तेः ईशानः प्रभुः अव्ययः। सर्वभावानाम् अद्वैतः देवः विभुः तुर्यो स्मृतः।। १.१०

प्राज्ञ-तैजस-विश्व-लक्षणानां सर्वदुःखानां निवृत्तेः ईशानः तुरीय आत्मा। ईशान इत्यस्य पदस्य व्याख्यानं प्रभुरिति। दुःख-निवृत्तिं प्रति प्रभुः भवतीत्यर्थः। तद्विज्ञान-निमित्तत्वाद् दुःख-निवृत्तेः। अव्ययः न व्येति, स्वरूपान्न व्यभिचरति, न च्यवत इति यावत्। एतत् कुतः यस्माद् अद्वैतः।

सर्वभावानां रज्जु-सर्पवद् मृषात्वात्। स एष देवः द्योतनात् तुर्यः चतुर्थः विभुः व्यापी स्मृतः।। १० ।।

विश्वादीनां सामान्य-विशेष-भावो निरूप्यते तुर्य-याथात्म्यावधारणार्थम् -

**कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।**

**प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ।। १.११ ।।**

तौ विश्वतैजसौ कार्यकारणबद्धौ इष्येते । प्राज्ञः तु कारणबद्धः। तौ द्वौ तुर्ये न सिध्यतः।। १.११ ।।

कार्यं क्रियत इति फलभावः, कारणं करोतीति बीज-भावः।

तत्त्वाग्रहणान्यथा-ग्रहणाभ्यां बीज-फलभावाभ्यां तौ यथोक्तौ विश्व-तैजसौ बद्धौ सङ्गृहीतौ इष्येते।

प्राज्ञः तु बीज-भावेनैव बद्धः। तत्त्वाप्रतिबोध-मात्रमेव हि बीजं प्राज्ञत्वे निमित्तम्।

ततः द्वौ तौ बीज-फलभावौ तत्त्वाग्रहणान्यथा-ग्रहणे तुर्ये न सिध्यतः न विद्येते, न सम्भवत इत्यर्थः।। ११ ।।

कथं पुनः कारण-बद्धत्वं प्राज्ञस्य, तुरीये वा तत्त्वाग्रहणान्यथा-ग्रहण-लक्षणौ बन्धौ न सिध्यतः इति यस्मात् -

**नाऽऽत्मानं न परांश्चैव न सत्यं नापि चानृतम् ।**

**प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक्सदा ।। १.१२ ।।**

प्राज्ञः आत्मानं न संवेत्ति। परान् च एव न (संवेत्ति)। सत्यं न (संवेत्ति)। अनृतम् अपि च न (संवेत्ति)। किञ्चन (न संवेत्ति)। तत् तुर्यं सदा सर्वदृक्।

आत्म-विलक्षणम् अविद्या-बीज-प्रसूतं बाह्यं द्वैतं प्राज्ञः न किञ्चन संवेत्ति, यथा विश्व-तैजसौ।

ततश्चासौ तत्त्वाग्रहणेन तमसा अन्यथा-ग्रहण-बीज-भूतेन बद्धो भवति।

यस्मात् तुरीयं तत्सर्वदृक्सदा तुरीयादन्यस्याभावात् सर्वदा सदैव इति, सर्वं च तद् दृक्चेति सर्वदृक्।

तस्मान्न तत्त्वाग्रहण-लक्षणं बीजं तत्र। तत्प्रसूतस्यान्यथा-ग्रहणस्याप्यत एवाभावः।

न हि सवितरि सदा प्रकाशात्मके तद्विरुद्धमप्रकाशनमन्यथा प्रकाशनं वा सम्भवति।

न हि द्रष्टुः दृष्टेः विपरिलोपो विद्यते (बृ. ४.३.२३) इति श्रुतेः।

अथवा, जाग्रत्स्वप्नयोः सर्व-भूतावस्थः सर्व-वस्तु-दृगाभासस्तुरीय एवेति सर्वदृक्सदा।

नान्यदतोऽस्ति द्रष्टृ (बृ. ३.८.११) इत्यादि-श्रुतेः।। १२ ।।

निमित्तान्तर-प्राप्ताशङ्का-निवृत्त्यर्थोऽयं श्लोकः -

**द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।**

**बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ।। १.१३ ।।**

द्वैतस्य अग्रहणं उभयोः प्राज्ञतुर्ययोः तुल्यम्। प्राज्ञः बीजनिद्रायुतः। सा (बीजनिद्रा) च तुर्ये न विद्यते।

कथं द्वैताग्रहणस्य तुल्यत्वात् कारण-बद्धत्वं प्राज्ञस्यैव, न तुरीयस्येति प्राप्ता आशङ्का निवर्त्यते।

यस्माद् बीज-निद्रा-युतः तत्त्वाप्रतिबोधो निद्रा, सैव च विशेष-प्रतिबोध-प्रसवस्य बीजम्, सा बीज-निद्रा, तया

युतः प्राज्ञः। सदा सर्वदृक्स्वभावत्वात् तत्त्वाप्रतिबोध-लक्षणा निद्रा तुरीये न विद्यते।

अतो न कारण-बन्धः तस्मिन् इत्यभिप्रायः।। १३ ।।

**स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।**

**न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ।। १.१४ ।।**

आद्यौ (विश्वतैजसौ) स्वप्ननिद्रायुतौ। प्राज्ञः तु अस्वप्ननिद्रया (युतः)। निश्चिताः तुर्ये निद्रां न फस्यन्ति। नैव स्वप्नं च (पश्यन्ति)।

स्वप्नः अन्यथा-ग्रहणं सर्प इव रज्ज्वां, निद्रा उक्ता तत्त्वाप्रतिबोध-लक्षणं तम इति।

ताभ्यां स्वप्न-निद्राभ्यां युतौ विश्व-तैजसौ। अतस्तौ कार्य-कारण-बद्धावित्युक्तौ।

प्राज्ञस्तु स्वप्न-वर्जितया केवलयैव निद्रया युत इति कारण-बद्ध इत्युक्तम्।

नोभयं पश्यन्ति तुरीये निश्चिताः ब्रह्मविद इत्यर्थः। विरुद्धत्वात्सवितरि इव तमः।

अतो न कार्य-कारण-बद्ध इत्युक्तस्तुरीयः।। १४ ।।

कदा तुरीये निश्चितो भवतीत्युच्यते -

**अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।**

**विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ।। १.१५ ।।**

तत्त्वम् अन्यथा गृह्णतः (पुरुषस्य) स्वप्नः। (तत्वम्) अजानतः (पुरुषस्य) निद्रा। तयोः (स्वप्ननिद्रयोः) विपर्यासे क्षीणे (सति पुरुषः) तुरीयं पदमश्नुते ।

स्वप्न-जागरितयोः अन्यथा रज्ज्वां सर्प इव गृह्णतः तत्त्वं स्वप्नः भवति। निद्रा तत्त्वमजानतः तिसृष्ववस्थासु तुल्या। स्वप्न-निद्रयोस्तुल्यत्वाद्विश्व-तैजसयोरेक-राशित्वम्। अन्यथा-ग्रहण-प्राधान्याच्च गुण-भूता निद्रेति तस्मिन्विपर्यासः स्वप्नः। तृतीये तु स्थाने तत्त्वाज्ञान-लक्षणा निद्रैव केवला विपर्यासः। अतः तयोः कार्य-कारण-स्थानयोः अन्यथा-ग्रहणाग्रहण-लक्षण-विपर्यासे कार्य-कारण-बन्ध-रूपे परमार्थ-तत्त्व-प्रतिबोधतः क्षीणे तुरीयं पदमश्नुते। तदा उभय-लक्षणं बन्ध-रूपं तत्रापश्यन् तुरीये निश्चितो भवतीत्यर्थः।। १५ ।।

**अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।**

**अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा।। १.१६ ।।**

यदा अनादिमायया सुप्तो जीवः प्रबुध्यते तदा अजमनिद्रमस्वप्नमद्वैतं बुध्यते ।

योऽयं संसारी जीवः, सः उभय-लक्षणेन तत्त्वाप्रतिबोध-रूपेण बीजात्मना, अन्यथा-ग्रहण-लक्षणेन च अनादि-काल-प्रवृत्तेन माया-लक्षणेन स्वप्नेन, ममायं पिता पुत्रोऽयं, नप्ता, क्षेत्रं, पशवः, अहमेषां स्वामी सुखी दुःखी क्षयितोऽहमनेन वर्धितश्चानेन इत्येवं-प्रकारान्स्वप्नान् स्थान-द्वयेऽपि पश्यन् सुप्तः, यदा वेदान्तार्थ-तत्त्वाभिज्ञेन परम-कारुणिकेन गुरुणा नास्येवं त्वं हेतुफलात्मकः, किन्तु तत्त्वमसि इति प्रतिबोध्यमानः, तदैवं प्रतिबुध्यते।

कथम् नास्मिन्बाह्यमाभ्यन्तरं वा जन्मादि-भाव-विकारोऽस्ति, अतः अजम् स बाह्याभ्यन्तरो ह्यजः (मु. २.१.२) इति श्रुतेः, सर्व-भाव-विकार-वर्जितमित्यर्थः।

यस्माज्जन्मादि-कारण-भूतं नास्मिन्नविद्या-तमो-बीजं निद्रा विद्यत इति अनिद्रम्। अनिद्रं हि तत्तुरीयम्।

अत एव अस्वप्नम्। तन्निमित्तत्वादन्यथा-ग्रहणस्य।

यस्माच्च अनिद्रमस्वप्नं तस्मादजम् अद्वैतं तुरीयमात्मानं बुध्यते तदा।। १६ ।।

प्रपञ्च-निवृत्त्या चेत्प्रतिबुध्यते, अनिवृत्ते प्रपञ्चे कथमद्वैतम् इत्युच्यते -

**प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः ।**

**मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।। १.१७ ।।**

यदि प्रपञ्चो विद्येत (तर्हि सः) निवर्त्तेत। (अत्र) संशयः न (अस्ति)। इदं द्वैतं मायामात्रम्। परमार्थतः अद्वैतं (एव विद्यते)।

सत्यमेवं स्यात् प्रपञ्चो यदि विद्येत। रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते। विद्यमानश्चेत् निवर्त्तेत न संशयः। न हि रज्ज्वां भ्रान्ति-बुद्ध्या कल्पितः सर्पो विद्यमानः सन्विवेकतो निवृत्तः। नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बन्धापगमे विद्यमाना सती निवृत्ता। तथा इदं प्रपञ्चाख्यं मायामात्रं द्वैतम्। रज्जुवद् मायाविवत् च अद्वैतं परमार्थतः। तस्मान्न कश्चित्प्रपञ्चः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः।। १७ ।।

ननु शास्ता शास्त्रं शिष्य इति विकल्पः कथं निवर्त्तते इति उच्यते -

**विकल्पो विनिवर्त्तेत कल्पितो यदि केनचित् ।**

**उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ।। १.१८ ।।**

यदि केनचित् विकल्पः कल्पितः (तर्हि सः विकल्पः) विनिवर्त्तेत। अयं (विकल्प-)वादः उपदेशात् (उपदेशनिमित्तः)। (परमार्थतत्वे) ज्ञाते द्वैतं न विद्यते ।

विकल्पो विनिवर्त्तेत यदि केनचित्कल्पितः स्यात्। यथाऽयं प्रपञ्चो माया-रज्जुसर्पवत्, तथाऽयं शिष्यादि-भेद-

विकल्पोऽपि प्राक् प्रतिबोधादेव उपदेश-निमित्तः। अतः उपदेशादयं वादः - शिष्यः शास्ता शास्त्रमिति।

उपदेश-कार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थ-तत्त्वे, द्वैतं न विद्यते।। १८ ।।

अभिधेय-प्रधानः ओङ्कारः चतुष्पादात्मेति व्याख्यातो यः -

**सोयमात्मा अध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादाः**

**अकार उकारो मकार इति।। ८।।**

सः अयमात्मा अध्यक्षरम्। ओङ्कारोऽधिमात्रम्। पादाः अकार उकारो मकारः इति मात्राः। मात्राश्च पादाः।

सोऽयम् आत्मा अध्यक्षरम् अक्षरमधिकृत्य अभिधान-प्राधान्येन वर्ण्यमानोऽध्यक्षरम्।

किं पुनस्तदक्षरमित्याह - ओङ्कारः।

सोऽयमोङ्कारः पादशः प्रविभज्यमानः, अधिमात्रं मात्रामधिकृत्य वर्त्तत इत्यधिमात्रम्।

कथम् आत्मनो ये पादाः ते ओङ्कारस्य मात्राः। कास्ताः अकार उकारो मकार इति।। ८ ।।

तत्र विशेष-नियमः क्रियते -

**जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा आप्तेरादिमत्वाद्वा**

**आप्नोति ह वै सर्वान् कामान् आदिश्च भवति य एवं वेद ।। ९ ।।**

जागरितस्थानः वैश्वानरः आप्तेरादिमत्वाद्वा प्रथमा मात्रा अकारः। यः एवं वेद (सः) ह वै सर्वान् कामान् आप्नोति। (सः) आदिश्च भवति ।

जागरितस्थानः वैश्वानरः यः स ओङ्कारस्य अकारः प्रथमा मात्रा।

केन सामान्येन इत्याह - आप्तेः आप्तिर्व्याप्तिः।

अकारेण सर्वा वाग्व्याप्ता, अकारो वै सर्वा वाक् (ऐ.आ. २.३.६) इतिश्रुतेः।

तथा वैश्वानरेण जगत्। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः (छा. ५.१८.२) इत्यादिश्रुतेः।

अभिधानाभिधेययोरेकत्वं चावोचाम। आदिरस्य विद्यत इति आदिमत्।

यथैव आदिमदकाराख्यमक्षरम्, तथैव वैश्वानरः। तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य।

तदेकत्व-विदः फलमाह - आप्नोति ह वै सर्वान्कामान्। आदिः प्रथमः च भवति महताम्।

य एवं वेद, यथोक्तमेकत्वं वेदेत्यर्थः।। ९ ।।

**स्वप्रस्थानः तैजस उकारो द्वितीया मात्रा। उत्कर्षाद् उभयत्वाद्वा**

**उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति**

**नास्याब्रह्मवित् कुले भवति य एवं वेद।। १०।।**

स्वप्रस्थानः तैजसः उत्कर्षाद् उभयत्वाद्वा द्वितीया मात्रा उकारः। य एवं वेद (सः) ह वै ज्ञानसन्ततिं उत्कर्षति। (सः) समानश्च भवति। अस्य कुले अब्रह्मवित् न भवति ।

स्वप्रस्थानः तैजसः यः स ओङ्कारस्य उकारः द्वितीया मात्रा। केन सामान्येन इत्याह - उत्कर्षात् अकारादुत्कृष्ट इव हि उकारः। तथा तैजसो विश्वात्। उभयत्वाद्वा। अकार-मकारयोर्मध्यस्थ उकारः। तथा विश्व-प्राज्ञयोर्मध्ये तैजसः। अत उभयभाक्त्व-सामान्यात्। विद्वत्फलमुच्यते - उत्कर्षति ह वै ज्ञानसन्ततिम्। विज्ञान-सन्ततिं वर्धयति इत्यर्थः। समानः तुल्यः च, मित्र-पक्षस्य इव शत्रु-पक्षाणामप्यप्रद्वेष्यो भवति। अब्रह्मविदस्य कुले न भवति, य एवं वेद।। १० ।।

**सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा**

**मिनोति ह वा इदँ्सर्वमपीतिश्च भवति य एवं वेद ।। ११ ।।**

सुषुप्तस्थानः प्राज्ञः मितेरपीतेर्वा तृतीया मात्रा मकारः। य एवं वेद (सः) ह वा इदं सर्वं मिनोति। (सः) अपीतिश्च भवति ।। ११ ।।

सुषुप्तस्थानः प्राज्ञः यः स ओङ्कारस्य मकारः तृतीया मात्रा।

केन सामान्येन इत्याह - सामान्यमिदमत्र मितेः मितिर्मानम्।

मीयेते इव हि विश्व-तैजसौ प्राज्ञेन प्रलयोत्पत्त्योः प्रवेश-निर्गमाभ्याम्, प्रस्थेन इव यवाः।

तथा ओङ्कार-समाप्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इव अकारोकारौ मकारे।

अपीतेर्वा अपीतिरप्ययः एकी-भावः। ओङ्कारोच्चारणे हि अन्त्येऽक्षरे एकी-भूतौ इव अकारोकारौ।

तथा विश्व-तैजसौ सुषुप्त-काले प्राज्ञे। अतो वा सामान्यादेकत्वं प्राज्ञ-मकारयोः।

विद्वत्फलमाह - मिनोति ह वै इदं सर्वम्, जगद्याथात्म्यं जानातीत्यर्थः।

अपीतिश्च जगत्कारणात्मा च भवति इत्यर्थः। अत्रावान्तर-फल-वचनं प्रधान-साधन-स्तुत्यर्थम्।। ११ ।।

अत्रैते श्लोका भवन्ति -

**विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।**

**मात्रासम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च ।। १.१९ ।।**

विश्वस्य अत्वविवक्षायाम् आदिसामान्यम् उत्कटम् (स्यात्)। मात्रासम्प्रतिपत्तौ आप्तिसामान्यम् एव च (उत्कटं स्यात्) ।

विश्वस्य अत्वम् अकार-मात्रत्वं यदा विवक्ष्यते, तदा आदित्वसामान्यम् उक्त-न्यायेन उत्कटम् उद्भूतं दृश्यत

इत्यर्थः। अत्व-विवक्षायामित्यस्य व्याख्यानम् - मात्रा-सम्प्रतिपत्तौ इति।

विश्वस्य अकार-मात्रत्वं यदा सम्प्रतिपद्यते इत्यर्थः।

आप्ति-सामान्यमेव च, उत्कटमित्यनुवर्त्तते, च-शब्दात्।। १९ ।।

**तैजसस्योत्वविज्ञाने उत्कर्षो दृश्यते स्फुटम् ।**

**मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथाविधम् ।। १.२० ।।**

तैजसस्य उत्वविज्ञाने उत्कर्षः स्फुटम् दृश्यते। मात्रासम्प्रतिपत्तौ उभयत्वं तथाविधं स्यात् ।। १.२० ।।

तैजसस्य उत्वविज्ञाने उकारत्व-विवक्षायाम् उत्कर्षो दृश्यते स्फुटं स्पष्टमित्यर्थः।

उभयत्वं च स्फुटमेवेति। पूर्ववत्सर्वम्।। २० ।।

**मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ।**

**मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ।। १.२१ ।।**

प्राज्ञस्य मकारभावे मानसामान्यम् उत्कटम्। मात्रासम्प्रतिपत्तौ तु लयसामान्यम् एव च (उत्कटम्)।

मकारत्वे प्राज्ञस्य मिति-लयौ उत्कृष्टे सामान्ये इत्यर्थः।। २१ ।।

**त्रिषु धामसु यस्तुल्यं सामान्यं वेत्ति निश्चितः ।**

**स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः ।। १.२२ ।।**

निश्चितः यः त्रिषु धामसु तुल्यं सामान्यं वेत्ति सः महामुनिः सर्वभूतानां पूज्यः वन्द्यश्च एव । (अथवा)
निश्चितः (यः) त्रिषु धामसु यत् तुल्यं सामान्यं वेत्ति सः महामुनिः सर्वभूतानां पूज्यः वन्द्यश्च एव ।

यथोक्त-स्थान-त्रये यः तुल्यम् उक्तं सामान्यं वेत्ति, एवमेवैतदिति निश्चितः सन् सः पूज्यः वन्द्यश्च ब्रह्मवित्

लोके भवति।। २२ ।।

यथोक्तैः सामान्यैः आत्म-पादानां मात्राभिः सह एकत्वं कृत्वा यथोक्तोङ्कारं प्रतिपद्य यो ध्यायति, तम् -

**अकारो नयते विश्वमुकारश्चापि तैजसम् ।**

**मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ।। १.२३ ।।**

अकारः विश्वं नयते उकारः च अपि तैजसम् (नयते)। मकारश्च पुनः प्राज्ञं (नयते)। अमात्रे गतिः न विद्यते।

अकारः नयते विश्वं प्रापयति। अकारालम्बनमोङ्कारं विद्वान्वैश्वानरो भवतीत्यर्थः। तथा उकारः तैजसम्।

मकारश्चापि पुनः प्राज्ञम्। च-शब्दान्नयत इत्यनुवर्त्तते। क्षीणे तु मकारे बीज-भाव-क्षयात् अमात्रे ओङ्कारे

गतिः न विद्यते क्वचिदित्यर्थः।। २३ ।।

## अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः

## एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद।। १२।।

अमात्रः चतुर्थः अव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः। एवमोङ्कार आत्मैव। य एवं वेद (सः) आत्मना आत्मानं संविशति।

अमात्रः मात्रा यस्य नास्ति सः अमात्रः ओङ्कारः। चतुर्थः तुरीयः आत्मैव केवलः।

अभिधानाभिधेय-रूपयोर्वाङ्मनसयोः क्षीणत्वात् अव्यवहार्यः।

प्रपञ्चोपशमः शिवः अद्वैतः संवृत्तः।

एवं यथोक्त-विज्ञानवता प्रयुक्त ओङ्कारः त्रिमात्रस्त्रिपादः आत्मैव।

संविशति आत्मना स्वेनैव स्वं पारमार्थिकम् आत्मानम्, य एवं वेद।

परमार्थ-दर्शी ब्रह्म-वित् तृतीयं बीज-भावं दग्ध्वा आत्मानं प्रविष्ट इति न पुनर्जायते, तुरीयस्य अबीजत्वात्।

न हि रज्जु-सर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पः बुद्धि-संस्कारात्पुनः पूर्ववत् तद्विवेकिनामुत्थास्यति।

मन्द-मध्यम-धियां तु प्रतिपन्न-साधक-भावानां सन्मार्ग-गामिनां संन्यासिनां मात्राणां पादानां च क्लृप्त-सामान्य-विदां यथावदुपास्यमान ओङ्कारो ब्रह्म-प्रतिपत्तये आलम्बनी-भवति।

तथा च वक्ष्यति - आश्रमास्त्रिविधाः(मा.का. ३.१६)इत्यादि।। १२ ।।

पूर्ववद् अत्रैते श्लोका भवन्ति -

**ओङ्कारं पादशो विद्यात्पादा मात्रा न संशयः ।**

**ओङ्कारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ।। १.२४ ।।**

ओङ्कारं पादशो विद्यात्। पादाः मात्राः (सन्ति)। (अत्र) संशयः न (अस्ति)। ओङ्कारं पादशो ज्ञात्वा किंचिदपि न चिन्तयेत्।

यथोक्तैः सामान्यैः पादा एव मात्राः, मात्राश्च पादाः। तस्माद् ओङ्कारं पादशः विद्यात् इत्यर्थः।

एवमोङ्कारे ज्ञाते दृष्टार्थमदृष्टार्थं वा न किञ्चिदपि प्रयोजनं चिन्तयेत्। कृतार्थत्वादित्यर्थः।। २४ ।।

**युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।**

**प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ।। १.२५ ।।**

प्रणवे चेतः युञ्जीत। प्रणवो निर्भयम् ब्रह्म। प्रणवे नित्ययुक्तस्य क्वचित् भयं न विद्यते।

युञ्जीत समादध्याद् यथा-व्याख्याते परमार्थ-रूपे प्रणवे चेतः मनः। यस्मात् प्रणवः ब्रह्म निर्भयम्।

न हि तत्र सदा युक्तस्य भयं विद्यते क्वचित्, विद्वान्न बिभेति कुतश्चन (तै. २.९) इति श्रुतेः।। २५ ।।

**प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।**

**अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ।। १.२६ ।।**

प्रणवो हि अपरं ब्रह्म। प्रणवश्च परः स्मृतः। प्रणवः अपूर्वोऽनन्तरोऽबाह्योऽनपरः अन्ययः।

परापरे ब्रह्मणी प्रणवः। परमार्थतः क्षीणेषु मात्रा-पादेषु पर एवात्मा ब्रह्म इति।

न पूर्वं कारणमस्य विद्यत इति अपूर्वः। नास्य अन्तरं भिन्न-जातीयं किञ्चिद्विद्यत इति अनन्तरः।

तथा बाह्यमन्यद् न विद्यत इति अबाह्यः। अपरं कार्यमस्य न विद्यत इति अनपरः।

सबाह्याभ्यन्तरो ह्यजः सैन्धव-घनवत् (प्रज्ञानघनः) इत्यर्थः।। २६ ।।

**सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।**

**एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।। १.२७ ।।**

प्रणवो हि सर्वस्य आदिः मध्यम् तथा एव च अन्तः। एवं हि प्रणवं ज्ञात्वा तदनन्तरम् व्यश्नुते।

आदिमध्यान्ताः उत्पत्ति-स्थिति-प्रलयाः।

सर्वस्य एव माया-हस्ति-रज्जु-सर्प-मृगतृष्णिका-स्वप्नादिवद् उत्पद्यमानस्य वियदादि-प्रपञ्चस्य यथा मायाव्यादयः

एवं हि प्रणवम् आत्मानं मायाव्यादि-स्थानीयं ज्ञात्वा तत्क्षणादेव तदात्म-भावं व्यश्नुते इत्यर्थः।। २७ ।।

**प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम् ।**

**सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ।। १.२८ ।।**

प्रणवं हि सर्वस्य हृदि संस्थितम् ईश्वरं विद्यात्। धीरः सर्वव्यापिनम् ओङ्कारं मत्वा न शोचति।

सर्वस्य प्राणि-जातस्य स्मृति-प्रत्ययास्पदे हृदये स्थितम् ईश्वरं प्रणवं विद्यात्।

सर्वव्यापिनं व्योमवद् ओङ्कारम् आत्मानमसंसारिणं धीरः धीमान्बुद्धिमान् आत्म-तत्त्वं मत्वा ज्ञात्वा न शोचति, शोक-निमित्तानुपपत्तेः। तरति शोकमात्मवित् (छा. ७.१.३) इत्यादि-श्रुतिभ्यः।। २८ ।।

**अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।**

**ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ।। १.२९ ।।**

येन अमात्रः अनन्तमात्रश्च द्वैतस्योपशमः शिवः ओङ्कारः विदितः स मुनिः। इतरो जनः न (मुनिः)।

अमात्रः तुरीयः ओङ्कारः। मीयते अनयेति मात्रा परिच्छित्तिः।

सा अनन्ता यस्य सः अनन्तमात्रः। नैतावत्त्वमस्य परिच्छेत्तुं शक्यत इत्यर्थः। सर्वद्वैतोपशमत्वादेव शिवः।

ओङ्कारः यथा-व्याख्यातो विदितो येन सः एव परमार्थ-तत्त्वस्य मननाद् मुनिः।

नेतरः जनः शास्त्रविदपीत्यर्थः।। २९ ।।